# shrI sudarshana sahasranAma stotram

# શ્રીસુદર્શનસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : sudarshana sahasranAma stotra

File name : sudarshana1000.itx

Category : sahasranAma, vishhnu, stotra

Location : doc_vishhnu

Transliterated by : Usha Iyer iyerku at gmail.com

Proofread by : Usha Iyer iyerku at gmail.com

Latest update : January 15, 2011

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 30, 2019

*sanskritdocuments.org*

# શ્રીસુદર્શનસહસ્રનામસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ॥

શ્રીસુદર્શન પરબ્રહ્મણે નમઃ ॥

અથ શ્રીસુદર્શન સહસ્રનામ સ્તોત્રમ્ ॥

કૈલાસશિખરે રમ્યે મુક્તામાણિક્ય મણ્ડપે ।
રક્તસિંહાસનાસીનં પ્રમથૈઃ પરિવારિતમ્ ॥ ૧॥

બધ્દાઞ્જલિપુટા ભૂત્વા પપ્રચ્છ વિનયાન્વિતા ।
ભર્તારં સર્વધર્મજ્ઞં પાર્વતી પરમેશ્વરમ્ ॥ ૨॥

પાર્વતી –
યત્ ત્વયોક્તં જગન્નાથ સુભ્રુશં ક્ષેમમિચ્છતામ્ ।
સૌદર્શનં રુતે શાસ્ત્રં નાસ્તિચાન્યદિતિ પ્રભો ॥ ૩॥

તત્ર કાચિત્ વિવક્ષાસ્થિ તમર્થં પ્રતિ મે પ્રભો ।
એવમુક્તસ્ત્વહિર્બુદ્ધ્યઃ પાર્વતીં પ્રત્યુવાચ તામ્ ॥ ૪॥

અહિર્બુદ્ધ્ય –
સંશયો યદિ તે તત્ર તં બ્રૂહિ ત્વં વરાનને ।
ઇત્યેવમુક્તા ગિરિજા ગિરિશેન મહાત્મના ॥ ૫॥

પુનઃ પ્રોવાચ સર્વજ્ઞં જ્ઞાનમુદ્રાધરં પતિમ્ ॥

પાર્વત્યુવાચ –
લોકે સૌદર્શનં મન્ત્રં યન્ત્રન્તત્તત્ પ્રયોગવત્ ॥ ૬॥

સર્વં વિજ્ઞાતુમભ્યત્ર યથાવત્ સમનુષ્ઠિતુમ્ ।
અતિવેલમશક્તાનાં તં માર્ગં ભૃશમીછ્તામ્ ॥ ૭॥

કો માર્ગઃ કા કથિસ્તેષામ્ કાર્યસિધ્દિઃ કથં ભવેત્ ।
એતન્મે બ્રૂહિ લોકેશ ત્વદન્યઃ કો વદેતમુમ્ ॥ ૮॥

ઈશ્વર ઉવાચ –
અહં તે કથયિશ્યામિ સર્વ સિદ્ધિકરં શુભમ્ ।
અનાયાસેન યજ્જપ્ત્વા નરસ્સિદ્ધિમવાપ્નુયાત્ ॥ ૯॥

તશ્ચ સૌદર્શનં દિવ્યં ગુહ્યં નામસહસ્રકમ્ ।
નિયમાત્ પઠતાં નૃણાં ચિન્તિતાર્થ પ્રદાયકમ્ ॥ ૧૦॥

તસ્ય નામસહસ્રસ્ય સોઽહમેવ ઋષિઃ સ્મૃતઃ ।
છન્દોનુષ્ટુપ્ દેવતા તુ પરમાત્મા સુદર્શનઃ ॥ ૧૧॥

શ્રીં બીજં હ્રીં તુ શક્તિસ્સા ક્લીં કીલકમુદાહૃતમ્ ।
સમસ્તાભીષ્ટ સિધ્યર્થે વિનિયોગ ઉદાહૃતઃ ॥ ૧૨॥

શઙ્ખં ચક્રં ચ ચાપાદિ ધ્યાનમસ્ય સમીરિતમ્ ॥

ધ્યાનં –
શઙ્ખં ચક્રં ચ ચાપં પરશુમસિમિશું શૂલ પાશાઙ્કુશાબ્જમ્
બિભ્રાણં વજ્રખેટૌ હલ મુસલ ગદા કુન્દમત્યુગ્ર દંષ્ટ્રમ્ ।
જ્વાલા કેશં ત્રિનેત્રં જ્વલ દલનનિભં હાર કેયૂર ભૂષમ્
ધ્યાયેત્ ષટ્કોણ સંસ્થં સકલ રિપુજન પ્રાણ સંહારિ ચક્રમ્ ॥

॥ હરિઃ Oમ્ ॥

શ્રીચક્રઃ શ્રીકરઃ શ્રીશઃ શ્રીવિષ્ણુઃ શ્રીવિભાવનઃ ।
શ્રીમદાન્ત્ય હરઃ શ્રીમાન્ શ્રીવત્સકૃત લક્ષણઃ ॥ ૧॥

શ્રીનિધિઃ શ્રીવરઃ સ્રગ્વી શ્રીલક્ષ્મી કરપૂજિતઃ ।
શ્રીરતઃ શ્રીવિભુઃ સિન્ધુકન્યાપતિઃ અધોક્ષજઃ ॥ ૨॥

અચ્યુતશ્ચામ્બુજગ્રીવઃ સહસ્રારઃ સનાતનઃ ।
સમર્ચિતો વેદમૂર્તિઃ સમતીત સુરાગ્રજઃ ॥ ૩॥

ષટ્કોણ મધ્યગો વીરઃ સર્વગોઽષ્ટભુજઃ પ્રભુઃ ।
ચણ્ડવેગો ભીમરવઃ શિપિવિષ્ટાર્ચિતો હરિઃ ॥ ૪॥

શાશ્વતઃ સકલઃ શ્યામઃ શ્યામલઃ શકટાર્થનઃ ।
દૈત્યારિઃ શારદસ્કન્ધઃ સકટાક્ષઃ શિરીષગઃ ॥ ૫॥

શરપારિર્ભક્તવશ્યઃ શશાઙ્કો વામનોવ્યયઃ ।

વરૂથીવારિજઃ કઞ્જલોચનો વસુધાદિપઃ ॥ ૬॥

વરેણ્યો વાહનોઽનન્તઃ ચક્રપાણિર્ગદાગ્રજઃ ।
ગભીરો ગોલકાધીશો ગદાપણિસ્સુલોચનઃ ॥ ૭॥

સહસ્રાક્ષઃ ચતુર્બાહુઃ શઙ્ખચક્ર ગદાધરઃ ।
ભીષણો ભીતિદો ભદ્રો ભીમાભીષ્ટ ફલપ્રદઃ ॥ ૮॥

ભીમાર્ચિતો ભીમસેનો ભાનુવંશ પ્રકાશકઃ ।
પ્રહ્લાદવરદઃ બાલલોચનો લોકપૂજિતઃ ॥ ૯॥

ઉત્તરામાનદો માની માનવાભીષ્ટ સિદ્ધિદઃ ।
ભક્તપાલઃ પાપહારી બલદો દહનધ્વજઃ ॥ ૧૦॥

કરીશઃ કનકો દાતા કામપાલ પુરાતનઃ ।
અક્રૂરઃ ક્રૂરજનકઃ ક્રૂરદંષ્ટ્રઃ કુલાદિપઃ ॥ ૧૧॥

ક્રૂરકર્મા ક્રૂરરૂપિ ક્રૂરહારી કુશેશયઃ ।
મન્દરો માનિનીકાન્તો મધુહા માધવપ્રિયઃ ॥ ૧૨॥

સુપ્રતપ્ત સ્વર્ણરૂપી બાણાસુર ભુજાન્તકૃત્ ।
ધરાધરો દાનવારિર્દનુજેન્દ્રારિ પૂજિતઃ ॥ ૧૩॥

ભાગ્યપ્રદો મહાસત્ત્વો વિશ્વાત્મા વિગતજ્વરઃ ।
સુરાચાર્યાર્ચિતો વશ્યો વાસુદેવો વસુપ્રદઃ ॥ ૧૪॥

પ્રણતાર્તિહરઃ શ્રેષ્ટઃ શરણ્યઃ પાપનાશનઃ ।
પાવકો વારણાદ્રીશો વૈકુણ્ઠો વિગતકલ્મષઃ ॥ ૧૫॥

વજ્રદંષ્ટ્રો વજ્રનખો વાયુરૂપી નિરાશ્રયઃ ।
નિરીહો નિસ્પૃહો નિત્યો નીતિજ્ઞો નીતિપાવનઃ ॥ ૧૬॥

નીરૂપો નારદનુતો નકુલાચલ વાસકૃત્ ।
નિત્યાનન્દો બૃહદ્ભાનુઃ બૃહદીશઃ પુરાતનઃ ॥ ૧૭॥

નિધિનામધિપોઽનન્દો નરકાર્ણવ તારકઃ ।
અગાધોઽવિરલો મર્ત્યો જ્વાલાકેશઃ કકાર્ચ્ચિતઃ ॥ ૧૮॥

તરુણસ્તનુકૃત્ ભક્તઃ પરમઃ ચિત્તસમ્ભવઃ ।
ચિન્ત્યસ્સત્વનિધિઃ સાગ્રસ્ચિદાનન્દઃ શિવપ્રિયઃ ॥ ૧૯॥

શિન્શુમારશ્શતમખઃ શાતકુમ્ભ નિભપ્રભઃ ।
ભોક્તારુણેશો બલવાન્ બાલગ્રહ નિવારકઃ ॥ ૨૦॥

સર્વારિષ્ટ પ્રશમનો મહાભય નિવારકઃ ।
બન્ધુઃ સુબન્ધુઃ સુપ્રીતસ્સન્તુષ્ટસ્સુરસન્નુતઃ ॥ ૨૧॥

બીજકેશ્યો બકો ભાનુઃ અમિતાર્ચિર્પામ્પતિઃ ।
સુયજ્ઞો જ્યોતિષશ્શાન્તો વિરૂપાક્ષઃ સુરેશ્વરઃ ॥ ૨૨॥

વહ્નિપ્રાકાર સંવીતો રક્તગર્ભઃ પ્રભાકરઃ ।
સુશીલઃ સુભગઃ સ્વક્ષઃ સુમુખઃ સુખદઃ સુખી ॥ ૨૩॥

મહાસુરઃ શિરચ્છેતા પાકશાસન વન્દિતઃ ।
શતમૂર્તિ સહસ્રારો હિરણ્ય જ્યોતિરવ્યયઃ ॥ ૨૪॥

મણ્ડલી મણ્ડલાકારઃ ચન્દ્રસૂર્યાગ્નિ લોચનઃ ।
પ્રભઞ્જનઃ તીક્ષ્ણધારઃ પ્રશાન્તઃ શારદપ્રિયઃ ॥ ૨૫॥

ભક્તપ્રિયો બલિહરો લાવણ્યોલક્ષણપ્રિયઃ ।
વિમલો દુર્લભસ્સોમ્યસ્સુલભો ભીમવિક્રમઃ ॥ ૨૬॥

જિતમન્યુઃ જિતારાતિઃ મહાક્ષો ભૃગુપૂજિતઃ ।
તત્ત્વરૂપઃ તત્ત્વવેદિઃ સર્વતત્વ પ્રતિષ્ઠિતઃ ॥૨૭॥

ભાવજ્ઞો બન્ધુજનકો દીનબન્ધુઃ પુરાણવિત્ ।
શસ્ત્રેશો નિર્મતો નેતા નરો નાનાસુરપ્રિયઃ ॥ ૨૮॥

નાભિચક્રો નતામિત્રો નધીશ કરપૂજિતઃ ।
દમનઃ કાલિકઃ કર્મી કાન્તઃ કાલાર્થનઃ કવિઃ ॥ ૨૯॥

વસુન્ધરો વાયુવેગો વરાહો વરુણાલયઃ ।
કમનીયકૃતિઃ કાલઃ કમલાસન સેવિતઃ ।
કૃપાલુઃ કપિલઃ કામી કામિતાર્થ પ્રદાયકઃ ॥ ૩૦॥

ધર્મસેતુર્ધર્મપાલો ધર્મી ધર્મમયઃ પરઃ ।
જ્વાલાજિહ્મઃ શિખામૌળીઃ સુરકાર્ય પ્રવર્તકઃ ॥ ૩૧॥

કલાધરઃ સુરારિઘ્નઃ કોપહા કાલરૂપદૃક્ ।
દાતાઽઽનન્દમયો દિવ્યો બ્રહ્મરૂપી પ્રકાશકૃત્ ॥ ૩૨ ।
સર્વયજ્ઞમયો યજ્ઞો યજ્ઞભુક્ યજ્ઞભાવનઃ ।

વહ્નિધ્વજો વહ્નિસખો વઞ્જુળદ્રુમ મૂલકઃ ॥ ૩૩॥

દક્ષહા દાનકારી ચ નરો નારાયણપ્રિયઃ ।
દૈત્યદણ્ડધરો દાન્તઃ શુભ્રાઙ્ગઃ શુભદાયકઃ ॥ ૩૪॥

લોહિતાક્ષો મહારૌદ્રૌ માયારૂપધરઃ ખગઃ ।
ઉન્નતો ભાનુજઃ સાઙ્ગો મહાચક્રઃ પરાક્રમી ॥ ૩૫॥

અગ્નીશોઽગ્નિમયઃ દ્વગ્નિલોચનોગ્નિ સમપ્રભઃ ।
અગ્નિમાનગ્નિરસનો યુધ્દસેવી રવિપ્રિયઃ ॥ ૩૬॥

આશ્રિત ઘૌઘ વિધ્વંસી નિત્યાનન્દ પ્રદાયકઃ ।
અસુરઘ્નો મહાબાહૂર્ભીમકર્મા શુભપ્રદઃ ॥ ૩૭॥

શશાઙ્ક પ્રણવાધારઃ સમસ્થાશી વિષાપહઃ ।
તર્કો વિતર્કો વિમલો બિલકો બાદરાયણઃ ॥ ૩૮॥

બદિરઘ્રસ્ચક્રવાળઃ ષટ્કોણાન્તર્ગતસ્શિખીઃ ।
દૃતધન્વા શોડષાક્ષો દીર્ઘબાહૂર્દરીમુખઃ ॥ ૩૯॥

પ્રસન્નો વામજનકો નિમ્નો નીતિકરઃ શુચિઃ ।
નરભેદિ સિંહરૂપી પુરાધીશઃ પુરન્દરઃ ॥ ૪૦॥

રવિસ્તુતો યૂતપાલો યુતપારિસ્સતાઙ્ગતિઃ ।
હૃષિકેશો દ્વિત્રમૂર્તિઃ દ્વિરષ્ટાયુદભૃત્ વરઃ ॥ ૪૧॥

દિવાકરો નિશાનાથો દિલીપાર્ચિત વિગ્રહઃ ।
ધન્વન્તરિસ્શ્યામળારિર્ભક્તશોક વિનાશકઃ ॥ ૪૨॥

રિપુપ્રાણ હરો જેતા શૂરસ્ચાતુર્ય વિગ્રહઃ ।
વિધાતા સચ્ચિદાનન્દસ્સર્વદુષ્ટ નિવારકઃ ॥ ૪૩॥

ઉલ્કો મહોલ્કો રક્તોલ્કસ્સહસ્રોલ્કસ્શતાર્ચિષઃ ।
બુધ્દો બૌધ્દહરો બૌધ્દ જનમોહો બુધાશ્રયઃ ॥ ૪૪ ॥

પૂર્ણબોધઃ પૂર્ણરૂપઃ પૂર્ણકામો મહાદ્યુતિઃ ।
પૂર્ણમન્ત્રઃ પૂર્ણગાત્રઃ પૂર્ણષાડ્ગુણ્ય વિગ્રહઃ ॥ ૪૫॥

પૂર્ણનેમિઃ પૂર્નનાભિઃ પૂર્ણાશી પૂર્ણમાનસઃ ।
પૂર્ણસારઃ પૂર્ણશક્તિઃ રઙ્ગસેવિ રણપ્રિયઃ ॥ ૪૬॥

પૂરિતાશોઽરિષ્ટદાતિ પૂર્ણાર્થઃ પૂર્ણભૂષણઃ ।
પદ્મગર્ભઃ પારિજાતઃ પરમિત્રસ્શરાકૃતિઃ ॥ ૪૭ ॥

ભૂબૃત્વપુઃ પુણ્યમૂર્તિ ભૂભૃતાં પતિરાશુકઃ ।
ભાગ્યોદયો ભક્તવશ્યો ગિરિજાવલ્લભપ્રિયઃ ॥ ૪૮ ॥

ગવિષ્ટો ગજમાનીશો ગમનાગમન પ્રિયઃ ।
બ્રહ્મચારિ બન્ધુમાની સુપ્રતીકસ્સુવિક્રમઃ ॥ ૪૯ ॥

શઙ્કરાભીષ્ટદો ભવ્યઃ સાચિવ્યસ્સવ્યલક્ષણઃ ।
મહાહંસસ્સુખકરો નાભાગ તનયાર્ચિતઃ ॥ ૫૦ ॥

કોટિસૂર્યપ્રભો દીપ્તો વિદ્યુત્કોટિ સમપ્રભઃ ।
વજ્રકલ્પો વજ્રસખો વજ્રનિર્ઘાત નિસ્વનઃ ॥ ૫૧ ॥

ગિરીશો માનદો માન્યો નારાયણ કરાલયઃ ।
અનિરુદ્ધઃ પરામર્ષી ઉપેન્દ્રઃ પૂર્ણવિગ્રહઃ ॥ ૫૨ ॥

આયુધેશસ્શતારિઘ્નઃ શમનઃ શતસૈનિકઃ ।
સર્વાસુર વધોદ્યુક્તઃ સૂર્ય દુર્માન ભેદકઃ ॥ ૫૩ ॥

રાહુવિપ્લોષકારી ચ કાશીનગર દાહકઃ ।
પીયુષાંશુ પરઞ્જ્યોતિઃ સમ્પૂર્ણ ક્રતુભુક્ પ્રભુઃ ॥ ૫૪ ॥

માન્ધાતૃ વરદસ્શુદ્ધો હરસેવ્યસ્શચીષ્ટદઃ ।
સહિષ્ણુર્બલભુક્ વીરો લોકભૃલ્લોકનાયકઃ ॥ ૫૫ ॥

દુર્વાસોમુનિ દર્પઘ્નો જયતો વિજયપ્રિયઃ ।
પુરાધીશોઽસુરારાતિઃ ગોવિન્દ કરભૂષણઃ ॥ ૫૬ ॥

રથરૂપી રથાધીશઃ કાલચક્ર કૃપાનિધિઃ ।
ચક્રરૂપધરો વિષ્ણુઃ સ્થૂલસૂક્ષ્મશ્શિખિપ્રભઃ ॥ ૫૭ ॥

શરણાગત સન્ત્રાતા વેતાળારિર્મહાબલઃ ।
જ્ઞાનદો વાક્પતિર્માની મહાવેગો મહામણિઃ ॥ ૫૮ ॥

વિદ્યુત્ કેશો વિહારેશઃ પદ્મયોનિઃ ચતુર્ભુજઃ ।
કામાત્મા કામદઃ કામી કાલનેમિ શિરોહરઃ ॥ ૫૯ ॥

શુભ્રસ્શુચીસ્શુનાસીરઃ શુક્રમિત્રઃ શુભાનનઃ ।
વૃષકાયો વૃષારાતિઃ વૃષભેન્દ્ર સુપૂજિતઃ ॥ ૬૦ ॥

વિશ્વમ્ભરો વીતિહોત્રો વીર્યો વિશ્વજનપ્રિયઃ ।
વિશ્વકૃત્  વિશ્વભો વિશ્વહર્તા સાહસકર્મકૃત્ ॥ ૬૧॥

બાણબાહૂહરો જ્યોતિઃ પરાત્મા શોકનાશનઃ ।
વિમલાદિપતિઃ પુણ્યો જ્ઞાતા જ્ઞેયઃ પ્રકાશકઃ ॥ ૬૨॥

મ્લેચ્છ પ્રહારી દુષ્ટઘ્નઃ સૂર્યમણ્ડલમધ્યગઃ ।
દિગમ્બરો વૃશાદ્રીશો વિવિધાયુધ રૂપકઃ ॥ ૬૩॥

સત્વવાન્ સત્યવાગીશઃ સત્યધર્મ પરાયણઃ ।
રુદ્રપ્રીતિકરો રુદ્ર વરદો રુગ્વિભેદકઃ ॥ ૬૪॥

નારાયણો નક્રભેદી ગજેન્દ્ર પરિમોક્ષકઃ ।
ધર્મપ્રિયઃ ષડાધારો વેદાત્મા ગુણસાગરઃ ॥ ૬૫॥

ગદામિત્રઃ પૃથુભુજો રસાતલ વિભેદકઃ ।
તમોવૈરી મહાતેજાઃ મહારાજો મહાતપાઃ ॥ ૬૬॥

સમસ્તારિહરઃ શાન્ત ક્રૂરો યોગેશ્વરેશ્વરઃ ।
સ્થવિરસ્સ્વર્ણ વર્ણાઙ્ગઃ શત્રુસૈન્ય વિનાશકૃત્ ॥ ૬૭॥

પ્રાજ્ઞો વિશ્વતનુત્રાતા શ્ૃતિસ્મૃતિમયઃ કૃતિ ।
વ્યક્તાવ્યક્ત સ્વરૂપાંસઃ કાલચક્રઃ કલાનિધિઃ ॥ ૬૮॥

મહાધ્યુતિરમેયાત્મા વજ્રનેમિઃ પ્રભાનિધિઃ ।
મહાસ્ફુલિઙ્ગ ધારાર્ચિઃ મહાયુદ્ધ કૃતચ્યુતઃ ॥ ૬૯॥

કૃતજ્ઞસ્સહનો વાગ્મી જ્વાલામાલા વિભૂષણઃ ।
ચતુર્મુખનુતઃ શ્રીમાન્ ભ્રાજિષ્ણુર્ભક્તવત્સલઃ ॥ ૭૦॥

ચાતુર્યગમનશ્ચક્રી ચાતુર્વર્ગ પ્રદાયકઃ ।
વિચિત્રમાલ્યાભરણઃ તીક્ષ્ણધારઃ સુરાર્ચિતઃ ॥ ૭૧॥

યુગકૃત્ યુગપાલશ્ચ યુગસન્ધિર્યુગાન્તકૃત્ ।
સુતીક્ષ્ણારગણો ગમ્યો બલિધ્વંસી ત્રિલોકપઃ ॥ ૭૨॥

ત્રિનેત્રસ્ત્રિજગદ્વન્ધ્યઃ તૃણીકૃત મહાસુરઃ ।
ત્રિકાલજ્ઞસ્ત્રિલોકજ્ઞઃ ત્રિનાભિઃ ત્રિજગત્પ્રિયઃ ॥ ૭૩॥

સર્વયન્ત્રમયો મન્ત્રસ્સર્વશત્રુ નિબર્હણઃ ।

સર્વગસ્સર્વવિત્ સૌમ્યસ્સર્વલોકહિતઙ્કરઃ ॥ ૭૪॥

આદિમૂલઃ સદ્ગુણાઢ્યો વરેણ્યસ્ત્રિગુણાત્મકઃ ।
ધ્યાનગમ્યઃ કલ્મષઘ્નઃ કલિગર્વ પ્રભેદકઃ ॥ ૭૫॥

કમનીય તનુત્રાણઃ કુણ્ડલી મણ્ડિતાનનઃ ।
સુકુણ્ઠીકૃત ચણ્ડેશઃ સુસન્ત્રસ્થ ષડાનનઃ ॥ ૭૬॥

વિષાધીકૃત વિઘ્નેશો વિગતાનન્દ નન્દિકઃ ।
મથિત પ્રમથવ્યૂહઃ પ્રણત પ્રમદાધિપઃ ॥ ૭૭॥

પ્રાણભિક્ષા પ્રદોઽનન્તો લોકસાક્ષી મહાસ્વનઃ ।
મેધાવી શાશ્વથોઽક્રૂરઃ ક્રૂરકર્માઽપરાજિતઃ ॥ ૭૮॥

અરી દૃષ્ટોઽપ્રમેયાત્મા સુન્દરશ્શત્રુતાપનઃ ।
યોગ યોગીશ્વરાધીશો ભક્તાભીષ્ટ પ્રપૂરકઃ ॥ ૭૯॥

સર્વકામપ્રદોઽચિન્ત્યઃ શુભાઙ્ગઃ કુલવર્ધનઃ ।
નિર્વિકારોઽન્તરૂપો નરનારાયણપ્રિયઃ ॥ ૮૦॥

મન્ત્ર યન્ત્ર સ્વરૂપાત્મા પરમન્ત્ર પ્રભેદકઃ ।
ભૂતવેતાળ વિધ્વંસી ચણ્ડ કૂષ્માણ્ડ ખણ્ડનઃ ॥ ૮૧॥

યક્ષ રક્ષોગણ ધ્વંસી મહાકૃત્યા પ્રદાહકઃ ।
સકલીકૃત મારીચઃ ભૈરવ ગ્રહ ભેદકઃ ॥ ૮૨॥

ચૂર્ણિકૃત મહાભૂતઃ કબલીકૃત દુર્ગ્રહઃ ।
સુદુર્ગ્રહો જમ્ભભેદી સૂચીમુખ નિષૂદનઃ ॥ ૮૩॥

વૃકોદરબલોદ્ધર્ત્તા પુરન્દર બલાનુગઃ ।
અપ્રમેય બલઃ સ્વામી ભક્તપ્રીતિ વિવર્ધનઃ ॥ ૮૪॥

મહાભૂતેશ્વરશ્શૂરો નિત્યસ્શારદવિગ્રહઃ ।
ધર્માધ્યક્ષો વિધર્મઘ્નઃ સુધર્મસ્થાપકશ્શિવઃ ॥ ૮૫॥

વિધૂમજ્વલનો ભાનુર્ભાનુમાન્ ભાસ્વતામ્ પતિઃ ।
જગન્મોહન પાટીરસ્સર્વોપદ્રવ શોધકઃ ॥ ૮૬॥

કુલિશાભરણો જ્વાલાવૃતસ્સૌભાગ્ય વર્ધનઃ ।
ગ્રહપ્રધ્વંસકઃ સ્વાત્મરક્ષકો ધારણાત્મકઃ ॥ ૮૭॥

સન્તાપનો વજ્રસારસ્સુમેધાઽમૃત સાગરઃ ।
સન્તાન પઞ્જરો બાણતાટઙ્કો વજ્રમાલિકઃ ॥ ૮૮॥

મેખાલગ્નિશિખો વજ્ર પઞ્જરસ્સસુરાઙ્કુશઃ ।
સર્વરોગ પ્રશમનો ગાન્ધર્વ વિશિખાકૃતિઃ ॥ ૮૯॥

પ્રમોહ મણ્ડલો ભૂત ગ્રહ શ‌ૃઙ્ખલ કર્મકૃત્ ।
કલાવૃતો મહાશઙ્ખુ ધારણસ્શલ્ય ચન્દ્રિકઃ ॥ ૯૦॥

છેદનો ધારકસ્શલ્ય ક્ષૂત્રોન્મૂલન તત્પરઃ ।
બન્ધનાવરણસ્શલ્ય કૃન્તનો વજ્રકીલકઃ ॥ ૯૧॥

પ્રતીકબન્ધનો જ્વાલા મણ્ડલસ્શસ્ત્રધારણઃ ।
ઇન્દ્રાક્ષીમાલિકઃ કૃત્યા દણ્ડસ્ચિત્તપ્રભેદકઃ ॥ ૯૨॥

ગ્રહ વાગુરિકસ્સર્વ બન્ધનો વજ્રભેદકઃ ।
લઘુસન્તાન સઙ્કલ્પો બદ્ધગ્રહ વિમોચનઃ ॥ ૯૩॥

મૌલિકાઞ્ચન સન્ધાતા વિપક્ષ મતભેદકઃ ।
દિગ્બન્ધન કરસ્સૂચી મુખાગ્નિસ્ચિત્તપાતકઃ ॥ ૯૪॥

ચોરાગ્નિ મણ્ડલાકારઃ પરકઙ્કાળ મર્દનઃ ।
તાન્ત્રીકસ્શાત્રુવંશઘ્નો નાનાનિગળ મોચનઃ ॥ ૯૫॥

સમસ્થલોક સારઙ્ગઃ સુમહા વિષદૂષણઃ ।
સુમહા મેરુકોદણ્ડઃ સર્વ વશ્યકરેશ્વરઃ ॥ ૯૬॥

નિખિલાકર્ષણપટુઃ સર્વ સમ્મોહ કર્મકૃત્ ।
સંસ્થમ્બન કરઃ સર્વ ભૂતોચ્ચાટન તત્પરઃ ॥ ૯૭॥

અહિતામય કારી ચ દ્વિષન્મારણ કારકઃ ।
એકાયન ગદામિત્ર વિદ્વેષણ પરાયણઃ ॥ ૯૮॥

સર્વાર્થ સિદ્ધિદો દાતા વિધાતા વિશ્વપાલકઃ ।
વિરૂપાક્ષો મહાવક્ષાઃ વરિષ્ટો માધવપ્રિયઃ ॥ ૯૯॥

અમિત્રકર્શન શાન્તઃ પ્રશાન્તઃ પ્રણતાર્તિહા ।
રમણીયો રણોત્સાહો રક્તાક્ષો રણપણ્ડિતઃ ॥ ૧૦૦॥

રણાન્તકૃત્ રતાકારઃ રતાઙ્ગો રવિપૂજિતઃ ।
વીરહા વિવિધાકારઃ વરુણારાધિતો વશીઃ ।

સર્વ શત્રુ વધાકાઙ્ક્ષી શક્તિમાન્ ભક્તમાનદઃ ॥ ૧૦૧॥

સર્વલોકધરઃ પુણ્યઃ પુરુષઃ પુરુષોત્તમઃ ।
પુરાણઃ પુણ્ડરીકાક્ષઃ પરમર્મ પ્રભેદકઃ ॥ ૧૦૨॥

વીરાસનગતો વર્મી સર્વાધારો નિરઙ્કુશઃ ।
જગત્રક્ષો જગન્મૂર્તિઃ જગદાનન્દ વર્ધનઃ ॥ ૧૦૩॥

શારદઃ શકટારાતિઃ શઙ્કરસ્શકટાકૃતિઃ ।
વિરક્તો રક્તવર્ણાઢ્યો રામસાયક રૂપદૃત્ ॥ ૧૦૪॥

મહાવરાહ્ દંષ્ટ્રાત્મા નૃસિંહ નગરાત્મકઃ ।
સમદૃઙ્મોક્ષદો વન્ધ્યો વિહારી વીતકલ્મષઃ ॥ ૧૦૫॥

ગમ્ભીરો ગર્ભગો ગોપ્તા ગભસ્તિર્ગુહ્યગોગુરુઃ ।
શ્રીધરઃ શ્રીરતસ્શ્રાન્તઃ શત્રુઘ્નસ્શ્ૃતિગોચરઃ ॥ ૧૦૬॥

પુરાણો વિતતો વીરઃ પવિત્રસ્ચરણાહ્વયઃ ।
મહાધીરો મહાવીર્યો મહાબલ પરાક્રમઃ ॥ ૧૦૭॥

સુવિગ્રહો વિગ્રહઘ્નઃ સુમાની માનદાયકઃ ।
માયી માયાપહો મન્ત્રી માન્યો માનવિવર્ધનઃ ॥ ૧૦૮॥

શત્રુસંહારકસ્શૂરઃ શુક્રારિશ્શઙ્કરાર્ચિતઃ ।
સર્વાધારઃ પરઞ્જ્યોતિઃ પ્રાણઃ પ્રાણભૃતચ્યુતઃ ॥ ૧૦૯॥

ચન્દ્રધામાઽપ્રતિદ્વન્દઃ પરમાત્મા સુદુર્ગમઃ ।
વિશુદ્ધાત્મા મહાતેજાઃ પુણ્યશ્લોકઃ પુરાણવિત્ ॥ ૧૧૦॥

સમસ્થ જગદાધારો વિજેતા વિક્રમઃ ક્રમઃ ।
આદિદેવો ધ્રુવો દૃશ્યઃ સાત્ત્વિકઃ પ્રીતિવર્ધનઃ ॥ ૧૧૧॥

સર્વલોકાશ્રયસ્સેવ્યઃ સર્વાત્મા વંશવર્ધનઃ ।
દુરાધર્ષઃ પ્રકાશાત્મા સર્વદૃક્ સર્વવિત્સમઃ ॥ ૧૧૨॥

સદ્ગતિસ્સત્વસમ્પન્નઃ નિત્યસઙ્કલ્પ કલ્પકઃ ।
વર્ણી વાચસ્પતિર્વાગ્મી મહાશક્તિઃ કલાનિધિઃ ॥ ૧૧૩॥

અન્તરિક્ષગતિઃ કલ્યઃ કલિકાલુષ્ય મોચનઃ ।
સત્યધર્મઃ પ્રસન્નાત્મા પ્રકૃષ્ટો વ્યોમવાહનઃ ॥ ૧૧૪॥

શિતધારસ્શિખિ રૌદ્રો ભદ્રો રુદ્રસુપૂજિતઃ ।
દરિમુખાગ્નિજમ્ભઘ્નો વીરહા વાસવપ્રિયઃ ॥ ૧૧૫ ॥

દુસ્તરસ્સુદુરારોહો દુર્જ્ઞેયો દુષ્ટનિગ્રહઃ ।
ભૂતાવાસો ભૂતહન્તા ભૂતેશો ભૂતભાવનઃ ॥ ૧૧૬ ॥

ભાવજ્ઞો ભવરોગઘ્નો મનોવેગી મહાભુજઃ ।
સર્વદેવમયઃ કાન્તઃ સ્મૃતિમાન્ સર્વપાવનઃ ॥ ૧૧૭ ॥

નીતિમન્ સર્વજિત્ સૌમ્યો મહર્ષીરપરાજિતઃ ।
રુદ્રામ્બરીષ વરદો જિતમાયઃ પુરાતનઃ ॥ ૧૧૮ ॥

અધ્યાત્મ નિલયો ભોક્તા સમ્પૂર્ણસ્સર્વકામદઃ ।
સત્યોઽક્ષરો ગભીરાત્મા વિશ્વભર્તા મરીચિમાન્ ॥ ૧૧૯ ॥

નિરઞ્જનો જિતભ્રાંશુઃ અગ્નિગર્ભોઽગ્નિ ગોચરઃ ।
સર્વજિત્ સમ્ભવો વિષ્ણુઃ પૂજ્યો મન્ત્રવિતક્રિયઃ ॥ ૧૨૦ ॥

શતાવર્ત્તઃ કલાનાથઃ કાલઃ કાલમયો હરિઃ ।
અરૂપો રૂપસમ્પન્નો વિશ્વરૂપો વિરૂપકૃત્ ॥ ૧૨૧ ॥

સ્વામ્યાત્મા સમરશ્લાઘી સુવ્રતો વિજયાંવિતઃ ।
ચણ્ડ્ઘ્નસ્ચણ્ડકિરણઃ ચતુરસ્ચારણપ્રિયઃ ॥ ૧૨૨ ॥

પુણ્યકીર્તિઃ પરામર્ષી નૃસિંહો નાભિમધ્યગઃ ।
યજ્ઞાત્મ યજ્ઞસઙ્કલ્પો યજ્ઞકેતુર્મહેશ્વરઃ ॥ ૧૨૩ ॥

જિતારિર્યજ્ઞનિલયશ્શરણ્યશ્શકટાકૃતિઃ ।
ઉત્તમોઽનુત્તમોનઙ્ગસ્સાઙ્ગસ્સર્વાઙ્ગ શોભનઃ ॥ ૧૨૪ ॥

કાલાગ્નિઃ કાલનેમિઘ્નઃ કામિ કારુણ્યસાગરઃ ।
રમાનન્દકરો રામો રજનીશાન્તરસ્થિતઃ ॥ ૧૨૫ ॥

સંવર્ધન સમરાંવેષી દ્વિષત્પ્રાણ પરિગ્રહઃ ।
મહાભિમાની સન્ધાતા સર્વાધીશો મહાગુરુઃ ॥ ૧૨૬
સિધ્દ્ઃ સર્વજગદ્યોનિઃ સિધ્દ્ધાર્થસ્સર્વસિધ્દ્દિદઃ ।
ચતુર્વેદમયશ્શાસ્થા સર્વશાસ્ત્ર વિશારદઃ ॥ ૧૨૭ ॥

તિરસ્કૃતાર્ક તેજસ્કો ભાસ્કરારાધિતશ્શુભઃ ।
વ્યાપી વિશ્વમ્ભરો વ્યગ્રઃ સ્વયઞ્જ્યોતિરનન્તકૃત્ ॥ ૧૨૮ ॥

જયશીલો જયાકાङ્ક્ષી જાતવેદો જયપ્રદઃ ।
કવિઃ કલ્યાણદઃ કામ્યો મોક્ષદો મોહનાકૃતિઃ ॥ ૧૨૯॥

કુङ્કુમારુણ સર્વાઙ્ગ કમલાક્ષઃ કવીશ્વરઃ ।
સુવિક્રમો નિષ્કળङ્કો વિશ્વક્સેનો વિહારકૃત્ ॥ ૧૩૦॥

કદમ્બાસુર વિધ્વંસી કેતનગ્રહ દાહકઃ ।
જુગુપ્સાઘ્નસ્તીક્ષ્ણધારો વૈકુણ્ઠ ભુજવાસકૃત્ ॥ ૧૩૧॥

સારજ્ઞઃ કરુણામૂર્તિઃ વૈષ્ણવો વિષ્ણુભક્તિદઃ ।
સુકૃતજ્ઞો મહોદારો દુષ્કૃતઘ્નસ્સુવિગ્રહઃ ॥ ૧૩૨॥

સર્વાભીષ્ટ પ્રદોઽન્તો નિત્યાનન્દો ગુણાકરઃ ।
ચક્રી કુન્દધરઃ ખડ્ગી પરશ્વત ધરોઽગ્નિભૃત્ ॥ ૧૩૩॥

દૃતાङ્કુશો દણ્ડધરઃ શક્તિહસ્થસ્સુશઙ્ખભ્રુત્ ।
ધન્વી દૃતમહાપાશો હલિ મુસલભૂષણઃ ॥ ૧૩૪॥

ગદાયુધધરો વજ્રી  મહાશૂલ લસત્ભુજઃ ।
સમસ્તાયુધ સમ્પૂર્ણસ્સુદર્શન મહાપ્રભુઃ ॥ ૧૩૫॥

॥ ફલશ્રુતિઃ ॥

ઇતિ સૌદર્શનં દિવ્યં ગુહ્યં નામસહસ્રકમ્ ।
સર્વસિદ્ધિકરં સર્વ યન્ત્ર મન્ત્રાત્મકં પરમ્ ॥ ૧૩૬॥

એતન્નામ સહસ્રં તુ નિત્યં યઃ પઠેત્ સુધીઃ ।
શ્રૃણોતિ વા શ્રાવયતિ તસ્ય સિદ્ધિઃ કરસ્તિતા ॥ ૧૩૭॥

દૈત્યાનાં દેવશત્રૂણાં દુર્જયાનાં મહૌજસામ્ ।
વિનાશાર્થમિદં દેવિ હરો રાસાધિતં મયા ॥ ૧૩૮॥

શત્રુસંહારકમિદં સર્વદા જયવર્ધનમ્ ।
જલ શૈલ મહારણ્ય દુર્ગમેષુ મહાપતિ ॥ ૧૩૯॥

ભયङ્કરેષુ શાપત્સુ સમ્પ્રાપ્તેષુ મહત્સુચ ।
યસ્સકૃત્ પઠનં કુર્યાત્ તસ્ય નૈવ ભવેત્ ભયમ્ ॥ ૧૪૦॥

બ્રહ્મઘ્નશ્ચ પશુઘ્નશ્ચ માતાપિતૃ વિનિન્દકઃ ।
દેવાનાં દૂષકશ્ચાપિ ગુરુતલ્પગતોઽપિ વા ॥ ૧૪૧॥

જપ્ત્વા સકૃતિદં સ્તોત્રં મુચ્યતે સર્વકિલ્બિષૈઃ ।
તિષ્ઠન્ ગચ્છન્ સ્વપન્ ભુઞ્જન્ જાગ્રન્નપિ હસન્નપિ ॥ ૧૪૨॥

સુદર્શન નૃસિંહેતિ યો વદેત્તુ સકૃન્નરઃ ।
સ વૈ ન લિપ્યતે  પાપૈઃ ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૧૪૩॥

આદયો વ્યાદયસ્સર્વે રોગા રોગાદિદેવતાઃ ।
શીઘ્રં નશ્યન્તિ તે સર્વે પઠનાત્તસ્ય વૈ નૃણામ્ ॥ ૧૪૪॥

બહૂનાત્ર કિમુક્તેન જપ્ત્વેદં મન્ત્ર પુષ્કલમ્ ।
યત્ર મર્ત્યશ્ચરેત્ તત્ર રક્ષતિ શ્રીસુદર્શનઃ ॥ ૧૪૫॥

ઇતિ શ્રી વિહગેશ્વર ઉત્તરખણ્ડે ઉમામહેશ્વરસંવાદે
મન્ત્રવિધાને શ્રી સુદર્શન સહસ્રનામ સ્તોત્રં નામ
ષોડશ પ્રકાશઃ ॥

Encoded and proofread by Usha K.Iyer  iyerku at gmail.com

---

*shrI sudarshana sahasranAma stotram*

pdf was typeset on November 30, 2019

Please send corrections to *sanskrit@cheerful.com*